अध्याय: 1

# किम्, कदा, कुत्र कथं च ?

रशीदायाः प्रश्नः

रशीदा उपविश्य वार्त्ता-पत्रं पठन्ती आसीत् सहसा तस्याः दृष्टिः वार्तापत्रस्य कस्मिंश्चित् शीर्षके अपतत् "शतवर्षेभ्यः पूर्वम्" । सा चिन्तयितुम् आरब्धवती यत् इदं कश्चित् कथं ज्ञातुं शक्नोति यत् एतावद्भ्यः वर्षेभ्यः पूर्वं किम् अभवत् ?



## कथं जानीमः

इदं ज्ञातुं यत् ह्यः किम् अभवत्, भवन्तः आकाशवाणीं श्रोतुं शक्नुवन्ति, दूरदर्शनं द्रष्टुं शक्नुवन्ति अथवा पुनः वार्त्तापत्रं पठितुं शक्नुवन्ति। सार्धम् एव इदं ज्ञातुं यत् गतवर्षे किम् अभवत् भवन्तः केनचित् एतादृशेन जनेन वार्त्तां कर्तुं शक्नुवन्ति यः तात्कालिकघटनाः स्मरति। परन्तु अतीतकाले किम् अभवत् इदं कथं ज्ञातुं शक्यते ?

## अतीतस्य विषये वयं किं ज्ञातुं शक्नुमः?

अतीतस्य विषये बहुकिमपि ज्ञातुं शक्यते – यथा जनाः किं खादन्ति स्म, कीदृशानि वस्त्राणि धरन्ति स्म, कीदृशेषु गृहेषु निवसन्ति स्म ? वयम् आखेटक-पशुपालक-कृषक-शासक-वणिक्-पुरोहित-शिल्पकार-कलाकार-संगीतकार-वैज्ञानिकानां वा जीवनविषये सूचनाः प्राप्तुं शक्नुमः । इदम् एव न वयं इदम् अपि ज्ञातुं शक्नुमः यत् तस्मिन् काले बालाः काः काः क्रीडाः क्रीडन्ति स्म, कीदृशीः कथाः शृण्वन्ति स्म, कानि नाटकानि पश्यन्ति स्म अथवा पुनः कीदृशानि गीतानि गायन्ति स्म।

## जनाः कुत्र निवसन्ति स्म?

प्रथमे मानचित्रे (पृष्ठ-२) नर्मदानद्याः विषये जानन्तु । लक्षाधिकेभ्यः वर्षेभ्यः जनाः एतस्याः नद्याः तटे निवसन्ति । अत्र वास्तव्येषु आरम्भिकेषु जनेषु केचन कुशलसङ्ग्राहकाः आसन् ये पार्श्वस्थवनानां विशालसम्पदः परिचिताः आसन् । स्वभोजनार्थं ते मूलानां फलानां अन्यवनोत्पादानां च इतः एव सङ्ग्रहणं कुर्वन्ति स्म। ते पशूनाम् आखेटम् अपि कुर्वन्ति स्म।

**अधुना भवन्तः उत्तर-पश्चिमयोः सुलेमान-किरथरोपत्यकाः अन्वेषयन्तु।**

एतस्मिन् क्षेत्रे एव कानिचन एतादृशानि स्थानानि सन्ति यत्र प्रायः अष्टसहस्रवर्षेभ्यः पूर्वं स्त्रीपुरुषाः आदौ गोधूम-यवसदृशानां सस्यानाम् उत्पादनम् आरब्धवन्तः । ते, मेष-अजा-गौ-वृषभसदृशानां पशूनां पालनम् आरब्धवन्तः । एते जनाः ग्रामेषु

निवसन्ति स्म। उत्तरपूर्वयोः गारो इत्येतं मध्यभारते च विंध्योपत्यकानाः अन्वेषयन्तु।
एतानि कानिचन अन्यानि एतादृशानि क्षेत्राणि आसन् यत्र कृषेः विकासः अभवत्।
यत्र आदौ तण्डुलकृषिः जाता तानि स्थानानि विंध्यस्य उत्तरे स्थिताः आसन्।

मानचित्रे सिन्धुनद्याः एतस्याः च सहायकनदीनाम् अन्वेषणस्य प्रयासं कुर्वन्तु। सहायकनद्यः ते उच्यन्ते याः कस्याञ्चित् महानद्यां विलीनाः भवन्ति। प्रायः ४७००वर्षेभ्यः प्राक् एतासां नदीनां तटेषु कानिचन आरम्भिकनगराणि विकसितानि। गङ्गायाः एतस्याः च सहायकनदीनां तटे समुद्रतटवर्ति-क्षेत्रेषु च नगराणां विकासः प्रायः २५०० वर्षेभ्यः प्राक् अभवत्।



### गंगायाः एतस्याः च सहायकनद्याः सोन इत्यस्याः अन्वेषणं कुर्वन्तु ।

गङ्गायाः दक्षिणे एतयोः नद्योः पार्श्वस्थं क्षेत्रं प्राचीनकाले “मगध” इति नाम्ना (वर्तमाने बिहारे वर्तते) ज्ञायते स्म। एतस्य शासकाः बहुशक्तिशालिनः आसन् अपि च ते किञ्चित् विशालं राज्यं स्थापितवन्तः आसन्। देशस्य अन्येषु भागेषु अपि एतादृशानां राज्यानां स्थापना कृता आसीत्।

जनाः सदैव उपमहाद्वीपस्य एकस्मात् भागात् अपरं भागं यावत् यात्रां कृतवन्तः। कदाचित् हिमालयसदृशोच्चपर्वतोपत्यका-मरुस्थल-नदीनां समुद्राणां च कारणतः यात्रा दुर्गमा भवति स्म पुनरपि एषा यात्रा तेषां कृते असम्भवभूता न आसीत्। अतः कदाचित् जनाः कार्यस्य उपवेशने अपि च कदाचित् प्राकृतिकापत्कारणात् एकस्मात् स्थानात् अपरस्थानं प्रति गमनं कुर्वन्ति स्म। कदाचित् सेनाः अपरेषां क्षेत्राणाम् उपरि विजयं प्राप्तुं गच्छन्ति स्म। एतदतिरिच्य वणिजः कदाचित् जलयानेषु आत्मभिः सह मूल्यवन्ति वस्तूनि स्वीकृत्य स्थानात् स्थानानन्तरं प्रति गच्छन्ति स्म। धार्मिकगुरवः जनान् शिक्षयन् परामृशन् च ग्रामात् ग्रामानन्तरं प्रति गच्छन्ति स्म। केचन जनाः नूतनानि रोचकानि च स्थानानि अन्वेष्टुं औत्सुक्यकारणात् अपि यात्रां कुर्वन्ति स्म। एताभिः यात्राभिः जनाः अन्योऽन्येषां विचारान् ज्ञातुम् अवसरान् प्राप्तवन्तः।

*प्रथमं मानचित्रं* ***दक्षिणैशियाम्*** *(आधुनिक-भारत-पाकिस्तान-बांग्लादेश-नेपाल-भूटान-श्रीलंका:) अफगानिस्तानं ईरानं चीनं म्यांमारं च दर्शयति एते भारतस्य प्रतिवेशिनः देशाः सन्ति । दक्षिणैशिया एकस्मात् द्वीपात् लघुः अस्ति,* ***तथा च*** *विशालतायाः दृष्ट्या शेष-एशियातः समुद्रोपत्यका-पर्वतेषु विभाजनकारणात् प्रायः* ***अयम् उपमहाद्वीपः*** *इति उच्यते।*

### अद्यत्वे जनाः यात्राः किमर्थं कुर्वन्ति ?

एकदा पुनः प्रथमं मानचित्रं पश्यन्तु। उपत्यकाः पर्वताः समुद्राः च एतस्य उपमहाद्वीपस्य प्राकृतिक-सीमायाः निर्माणं कुर्वन्ति। यद्यपि जनैः सीमानां पारे गमनं सरलं नासीत् यैः यादृशम् इष्टं तैः तादृशं कृतम्, ते पर्वतानाम् औन्नत्यं स्प्रष्टुं शक्तवन्तः। उपमहाद्वीपस्य बहिस्तात् अपि जनाः अत्र आगतवन्तः अपि च अत्रैव वासं कृतवन्तः। जनानाम् अनेन आवागमनेन अस्माकं सांस्कृतिक-परम्परायां समृद्धिः अभवत्। बहुभ्यः वर्षेभ्यः जनाः पाषाणानाम् अल्पांशकर्तनस्य (तराशना) सङ्गीतरचनस्य एतदतिरिच्य भोजनपाकस्य च नूतना**नां** प्रकाराणाम् उपायानाम् अथवा विधीनां विषये अन्योऽन्येषां विचाराणाम् आदानं प्रदानं च कुर्वन्ति स्म।

### देशस्य नामानि

वयम् अस्माकं देशाय प्रायः ‘इण्डिया-भारत-सदृशयोः’ शब्दयोः प्रयोगं कुर्मः। इण्डिया इति शब्दः इण्डस इति शब्दात् निष्पन्नः यः संस्कृते ‘सिन्धुः’ इति उच्यते। स्वमानचित्रे ईरानस्य यूनानस्य च अन्वेषणं कुर्वन्तु। प्रायः पञ्चशताधिकद्विसहस्र-वर्षेभ्यः उत्तर-पश्चिमाभ्यां दिग्भ्याम् आगम्यमानाः ईरानवासिनः यूनानवासिनः च सिन्धुं हिन्दोस अथवा इन्दोस तथा च अस्याः नद्याः पूर्वभागे स्थितं भूमिप्रदेशं इण्डिया इति उक्तवन्तः। भरत इति नाम्नः प्रयोगः उत्तर-पश्चिमयोः दिशि निवसतां जनानां

कस्यचित् समूहस्य कृते क्रियते स्म । अस्य समूहस्य उल्लेखः संस्कृतस्य आरम्भिकी-कृत्याम् ऋग्वेदे अपि लभ्यते । अनन्तरम् अस्य प्रयोगः देशाय कृतः वर्तते ।

## अतीतस्य कालस्य विषये कथं ज्ञातुं शक्नुमः ?

अतीतस्य विषये वयं बहुविधरूपेण ज्ञातुं शक्नुमः । एतेषु एकः विधिः वर्तते यत् अतीतकाले लिखितानां पुस्तकानाम् अन्वेषणम्, अपि च पठनम् । एतानि पुस्तकानि हस्तेन लिखितानि इति कारणेन पाण्डुलिपिः इति उच्यते । आङ्ग्ले पाण्डुलिपये प्रयुक्तः 'मैन्यूस्क्रिप्ट्' इति शब्दः लैटिन् इत्यस्य 'मेनू' अर्थात् 'हस्तः' इति शब्दात् स्वीकृतः । एताः पाण्डुलिपयः प्रायः ताडपत्रेषु अथवा हिमालयस्य क्षेत्रेषु उत्पद्यमानेषु भूर्ज इति नामकेभ्यः वृक्षेभ्यः विशेषरीत्या लभ्यमानेषु पत्रेषु लिखितरूपेण लभन्ते ।

**ताडपत्रनिर्मितायाः पाण्डुलिपेः किञ्चित् पृष्ठम्**

इयं पाण्डुलिपिः प्रायः सहस्रवर्षेभ्यः प्राक् लिखिता आसीत् । पुस्तकं निर्मातुं ताडस्य पत्राणि कर्तयित्वा तेषां पृथक् पृथक् भागाः सहैव बध्यन्ते स्म । भूर्जपत्रत्वचा बद्धां एतादृशीं एव पाण्डुलिपिं भवती अत्र द्रष्टुं शक्नोति ।

एतावत्सु वर्षेषु जातेषु सत्सु बह्व्यः पाण्डुलिपयः कीटैः खादिताः येन काश्चन नष्टाः अभवन् । तथापि काश्चन पाण्डुलिपयः अधुना अपि उपलभ्यन्ते । प्रायः एताः पाण्डुलिपयः मन्दिरेषु विहारेषु च प्राप्यन्ते । एतेषु पुस्तकेषु धार्मिक-मान्यतानाम् अथवा व्यवहाराणां, राज्ञां जीवनविषये, औषधीनां तथा च विज्ञानादि-सर्वप्रकारक-विषयाणां चर्चा प्राप्यते । एवम् एतदतिरिच्य एतासु अस्माकं महाकाव्यानि कविताः, तथा च नाटकानि अपि सन्ति । एतासु अधिकाः संस्कृतभाषायां लिखिताः सन्ति तथापि काश्चन प्राकृतभाषायां अपि च तमिलभाषायां सन्ति । प्राकृतभाषायाः प्रयोगं सामान्यजनाः कुर्वन्ति स्म ।

वयम् अभिलेखानाम् अपि अभ्यासं कर्तुं शक्नुमः । एतादृशाः लेखाः पाषाणानाम् अथवा धातुसदृशानाम् अपेक्षया कठोरतलेषु उत्कीर्णाः सन्ति । यदा-कदा शासकः अथवा अन्यजनः स्वस्य आदेशान् अनेन प्रकारेण उत्कीर्णं कारयन्ति स्म, तथा च जनाः तान् आदेशान् द्रष्टुं शक्नुवन्ति, पठितुं शक्नुवन्ति, तथा च पालनं कर्तुं



शक्नुवन्ति। केचन अन्यप्रकारकाः अभिलेखाः अपि लभ्यन्ते येषु राजभिः तथा च राज्ञीभिः सह अन्यैः स्त्रीपुरुषैः अपि स्वकीयानां कार्याणाम् आलेखनं कारितम्। उदाहरणार्थं प्रायः शासनानि युद्धेषु प्राप्तानां विजयानां विषये लेखालेखनं कुर्वन्ति स्म।

**'किं भवान् वक्तुं शक्नोति यत् 'कठोरतले लेखस्य लेखनेन के के लाभाः आसन्? अपि च कानि कानि कष्टानि आसन्?'**



एतदतिरिक्तम् अन्यानि बहूनि वस्तूनि पुरातनकाले निर्मितानि प्रयुक्तानि च आसन्। एतादृशानां वस्तूनाम् अध्ययनकर्ता 'पुरातत्त्वशास्त्रज्ञः' इति कथ्यते। पुरातत्त्वशास्त्रज्ञाः पाषाणैः अपि च इष्टिकाभिः निर्मितानां भवनानां अवशेषाणाम्, चित्राणां तथा च मूर्तीनाम् अध्ययनं कुर्वन्ति। ते उपकरणानाम्, शस्त्राणाम्, पात्राणाम्, आभूषणानां नाणकानां च कृते अन्वेषणानि तथा च खननम् अपि कुर्वन्ति। एतेषु कानिचन वस्तूनि पाषाणैः पक्वमृत्तिकाभिः धातुभिः च निर्मितानि भवितुं शक्नुवन्ति। एतादृशानि तत्त्वानि कठोराणि शीघ्रं च विनष्टशीलानि न भवन्ति।

पुरातत्त्वशास्त्रज्ञः पशूनाम्, पक्षिणां तथा च मीनानाम् अस्थ्नाम् अपि अन्वेषणं कुर्वन्ति। एतेन तेषां साहाय्यं भवति स्म यत्पुरातनकाले जनाः किं खादन्ति स्म इति। वनस्पतीनाम् अवशेषाः बहुकष्टरूपेण रक्षिताः भवन्ति। यदि अन्नकणस्य अथवा काष्ठस्य शाखायाः दहनं भवति चेत् दग्धरूपेण अवशिष्टानि भवन्ति।





प्रायः २२५० वर्षपुरातनः अयम् अभिलेखः वर्तमानाफगानिस्तानस्य कंधारतः प्राप्तः अस्ति। अयम् अभिलेखः अशोकनामकस्य शासकस्य आदेशेन उत्कीर्णः कारितः आसीत्। अस्य शासकस्य विषये भवती अष्टमे अध्याये पठिष्यति। यदा वयं कस्याश्चित् लिपेः प्रयोगं कुर्मः। लिपयः अक्षरैः सङ्केतैः वा निर्मिताः भवन्ति। यदा वयं किञ्चित् लिखामः अथवा वदामः तदा वयं कस्याश्चित् भाषायाः प्रयोगं कुर्मः। अयम् अभिलेखः अस्मिन् क्षेत्रे प्रयुक्तयूनानी-अरामेइकनामकयोः द्वयोः भिन्नयोः लिप्योः अपि च भाषयोः वर्तते।

## किं भवन्तः चिन्तयन्ति यत् पुरातत्त्वविदाः प्रायः वस्त्रावशेषान् एव् प्राप्नुवन्ति ?

पाण्डुलिपिभिः, अभिलेखैः तथा च पुरातत्त्वेन लभ्यमानज्ञानस्य कृते इतिहासकाराः प्रायः 'स्रोत' इति शब्दस्य प्रयोगं कुर्वन्ति। 'इतिहासकाराः' ते एव कथ्यन्ते ये पुरातनस्य अध्ययनं कुर्वन्ति। स्रोतसः प्राप्तिमात्रेण एव पुरातनस्य विषये अध्ययनं बहु रोचकं भवति, यतो हि एतेषां स्रोतसां साहाय्येन वयं शनैः शनैः पुरातनस्य पुनर्निर्माणं कर्तुं शक्नुमः । अतः इतिहासकाराः तथा च पुरातत्त्वज्ञाः गुप्तचराणाम् इव सन्ति ये एतेषां सर्वेषां स्रोतसां प्रयोगः सरलरूपेण कृत्वा पुरातनस्य विषयस्य ज्ञानार्थं प्रयासं कुर्वन्ति।

वामतः – कस्माच्चित् प्राचीननगरात् प्राप्तानि पात्राणि एतादृशानां पात्राणां प्रयोगः 4700 वर्षपूर्वं भवति स्म । दक्षिणतः- किञ्चन पुरातनं रजतनाणकम् । एतादृशानां निष्काणां प्रयोगः प्रायः 2500 वर्षपूर्वं भवति स्म । अस्माभिः अद्यत्वे प्रयुज्यमाननिष्केभ्यः एताः मुद्राः कथं भिन्नाः सन्ति ?

## अतीतः, एकः अनेके वा?

किं त्वया अस्य पुस्तकशीर्षकस्य 'अस्माकम् अतीतः' इत्यस्य उपरि ध्यानं दत्तम् ? अत्र 'अतीतः' इति शब्दः यद्यपि एकवचने अस्ति तथापि अस्य प्रयोगः बहुवचनत्वेन कृतः अस्ति। एवम् अस्य तत्त्वस्य उपरि ध्यानं दापयितुं कृतम् अस्ति यत् भिन्न-भिन्न समूहजनानां कृते अस्य अतीतस्य भिन्न-भिन्न भावनाः आसन् । उदाहरणार्थं पशुपालकानाम् अथवा कृषकाणां जीवनं राज्ञां राज्ञीनां च जीवनेन सह एवं व्यापारीणां जीवनं शिल्पकाराणां जीवनेन सह बहु भिन्नम् आसीत्। यथा वयम् अद्यत्वे अपि पश्यामः तथैव तस्मिन् समये अपि देशस्य भिन्न-भिन्न स्थानेषु जनाः भिन्न-भिन्न रूपेण व्यवहाराणां रीतीनां पालनं कुर्वन्ति स्म । उदाहरणार्थम् अद्यत्वे अण्डमानद्वीपस्य अधिकांशजनाः तेषां भोजनं मीनानां सङ्ग्रहेण, आखेटेन, फल-पुष्पाणां सङ्ग्रहेण च प्राप्नुवन्ति । अस्य विपरीतरूपेण नगरेषु उषिताः जनाः खाद्यापूर्ति-निमित्तम् अन्यस्य उपरि आधारिताः भवन्ति । एतादृशाः भेदाः अतीते अपि विद्यमानाः आसन्।

एतदतिरिक्तः एकः अन्यः भेदः अस्ति । तस्मिन् समये शासकाः स्वस्य विजयानां लेखा-आलेखनं (कुर्वन्ति) स्म । एतदेव कारणम् अस्ति यत् वयं तान् शासकान् अपि च तैः युद्ध्यमानानां युद्धानां विषये बहु किमपि ज्ञातवन्तः। एवम् आखेटकः, धीवरः, सङ्ग्राहकः, कृषकः पशुपालकः च एवम् प्रकारकाः सामान्यजनाः प्रायः स्वस्य कार्याणां लेख-आलेखनं न कुर्वन्ति स्म । पुरातत्त्वस्य साहाय्येन वयं तेषां जीवनस्य विषये ज्ञानं प्राप्नुमः । यद्यपि अधुना अपि अस्य उपरि बहु किमपि ज्ञातुम् अवशिष्टं वर्तते।



## तिथीनाम् अभिप्रायः

यदि कश्चित् भवतीं तिथिविषये पृच्छेत् तर्हि प्रायः भवती तस्य दिनस्य दिनाङ्कं मासं वर्षं यथा २०००अथवा एवंविधं किञ्चित् वर्षं वदिष्यति । वर्षस्य इयं गणना क्रैस्तधर्म-प्रवर्तकस्य ईसामसीहस्य जन्मनः तिथेः क्रियते। अतः २०००वर्षं कथनस्य तात्पर्यम् ईशामसीहस्य जन्मनः २०००वर्षाणां पश्चात् अस्ति। ईसामसीहस्य जन्मनः पूर्वतनीयाः सर्वाः तिथयः ई.पू. (ईसातः प्राक्) इत्यस्य रूपेण ज्ञायन्ते । अस्मिन् पुस्तके वयं २००० इत्येतं स्वस्य आरम्भिकं बिन्दुं मन्यमानाः वर्तमानतः पूर्वेषां तिथीनाम् उल्लेखं करिष्यामः।

### अन्यत्र

इतिहासः तिथयः च

आग्लभाषायां बी.सी(हिन्द्याम् ई.पू.) इत्यस्य तात्पर्यं "बिफ़ोर-क्राइस्ट" (ईसा-पूर्वम्) इति भवति ।

कदाचित् भवती तिथिभ्यः प्राक् ए.डी (हिन्द्याम् ई.) इति लिखितं पश्यति इदम् "एनो-डॉमिनी" नामकाभ्यां द्वाभ्यां लैटिन-शब्दाभ्यां निर्मितम् अस्ति ।अस्य तात्पर्यम् ईसामसीहस्य जन्मवर्षेण अस्ति ।

कदाचित् ए.डी. इत्यस्य स्थाने सी.ई. इति तथा च बी.सी. इत्यस्य स्थाने बी.सी.ई. इत्यस्य प्रयोगः भवति । सी.ई. इति अक्षराणां प्रयोगस्य "कामन-एरा" अपि च बी.सी.ई. इत्यस्य "बिफोर-कामन-एरा" इत्यस्य कृते भवति । वयम् एतेषां शब्दानां प्रयोगम् एतदर्थं कुर्मः यतो हि विश्वस्य अधिकांशदेशेषु अधुना एतस्य दिनदर्शिकायाः प्रयोगः सामान्यः अभवत् ।भारते तिथीनाम् एतेषां रूपाणां प्रयोगः प्रायः द्विशतवर्षेभ्यः प्राक् आरब्धः आसीत् ।

यदा-कदा आङ्ग्लस्य बी.पी.इति अक्षराणां प्रयोगः भवति येषां तात्पर्यं "बिफ़ोर-प्रेजेन्ट" (वर्तमानात् प्राक्) इति अस्ति ।

तृतीये पृष्ठे द्वे तिथी स्तः तेषां विषये जानातु ।एतदर्थं भवती कस्य अक्षरसमूहस्य प्रयोगं करिष्यति ?

यथा भवत्या पूर्वं पठितम्, अभिलेखाः दृढेषु तलेषु उत्कीर्णयन्ते। एतेषु केचन अभिलेखाः शताधिकवर्षेभ्यः पूर्वं लिखिताः आसन्। सर्वेषु अभिलेखेषु लिपीनां भाषाणां च प्रयोगः अभवत्। कालक्रमेण अभिलेखेषु प्रयुक्तभाषासु लिपिषु च बहु-परिवर्तनं जातम् अस्ति। विद्वाँसः इदं कथं ज्ञातुं पारयन्ति यत् किं लिखितम्



आसीत् ? एतस्य ज्ञानम् अज्ञातलिपेः अर्थावगमनस्य कयाचित् प्रक्रियया कर्तुं शक्यते ।

अनेन प्रकारेण अज्ञातलिपेः अवगमनस्य काचित् प्रसिद्धा कथा उत्तरी-अफ्रीकीदेशात् मिश्रतः लभते । प्रायः ५००० वर्षेभ्यः प्राक् अत्र राजा राज्ञी च निवसतः स्म ।

मिस्रस्य उत्तरीये तटे रोसेट्टानामकः कश्चित् महाग्रामः अस्ति । ततः कश्चित् एतादृशः उत्कीर्ण-पाषाणः प्राप्तः अस्ति यस्मिन् एकः एव लेखः तिसृषु भिन्नासु भिन्नासु भाषासु लिपिषु (यूनानीमिश्रीलिप्योः द्वयोः प्रकारयोः) च अस्ति । केचन विद्वाँसः यूनानीभाषां पठितुं शक्नुवन्ति स्म । ते उक्तवन्तः यत् अत्र राज्ञां राज्ञीनां च नामानि लघुषु लघुषु भित्तिचित्रेषु दर्शितानि सन्ति । सः 'कारतूशः' इति उच्यते । तदनन्तरं विद्वान्सः यूनानी-मिस्रीसेङ्केतान् पृथक् पृथक् स्थापयन्तः मिस्र्यक्षराणां समानार्थकध्वनीनां परिचयं प्राप्तवन्तः । यथा भवती द्रष्टुं शक्नोति अत्र एल इति अक्षरस्य कृते सिंहस्य अपि च ए इति अक्षरस्य कृते चटकायाः चित्राणि निर्मितानि सन्ति । एकदा यदा ते इदं ज्ञातवन्तः यत् विभिन्नाः अक्षराः केषां कृते प्रयुक्ताः सन्ति तर्हि ते अन्यान् अभिलेखान् अपि पठितुं शक्तवन्तः ।

## कल्पनां कुर्वन्तु

भवत्या कस्यचित् पुरातत्त्वविदः साक्षात्कारः स्वीकरणीयः । भवती तेषां पञ्चानां प्रश्नानां काञ्चित् सूचीं सज्जीकरोतु यान् प्रश्नान् भवती पुरात्त्वविदः प्रष्टुम् इच्छति

### आगच्छन्तु स्मरणं कुर्मः



१. निम्नलिखितानां सुमेलनं कुर्वन्तु

| | |
|---|---|
| नर्मदा-घाटी | प्रथमं महत् राज्यम् |
| मगधः | आखेटः सङ्ग्रहणं च |
| गारो उपत्यकाः | प्रायः २५००वर्षपूर्वस्य नगरम् |
| सिन्धुः तथा च एतस्याः सहायकनद्यः | आरम्भिक-कृषिः |
| गङ्गा-घाटी | प्रथमनगरम् |

### आगच्छन्तु कृत्वा पश्यामः



२. पाण्डुलिपिषु अपि च अभिलेखेषु किञ्चित् प्रमुखम् अन्तरं ज्ञापयन्तु ।

३. रशीदायाः प्रश्नं पुनः पठन्तु । एतस्य कानि उत्तराणि भवितुं शक्नुवन्ति ?

४. पुरातत्त्वविद्भिः लभ्यमानानां सर्वेषां वस्तूनां काञ्चित् सूचीं रचयतु । एतेषु कानि वस्तूनि पाषाणमयानि भवितुं शक्नुवन्ति ?

५. साधारणस्त्रियः अथवा साधारणपुरुषाः स्वकार्याणां विवरणं किमर्थं न स्थापयन्ति स्म ? एतस्मिन् विषये भवती किं चिन्तयति ?

**उपयोगिशब्दाः**

यात्रा, पाण्डुलिपिः, अभिलेखः, पुरातत्त्वम्, इतिहासकारः,स्रोतः, अज्ञात-लिपेः अर्थसङ्गतिकरणम्

काश्चन महत्वपूर्णाः तिथयः

- कृषेः आरम्भः (८०००वर्षेभ्यः प्राक्)
- सिन्धु-सभ्यतायाः प्रथम-नगराणि(४७००वर्षेभ्यः पूर्वम्)
- गङ्गा-घाट्याः नगराणि,मगधस्य महत् राज्यम्(२५००वर्षेभ्यः पूर्वम्)
- वर्तमानं (प्रायः २०००वर्षेभ्यः पूर्वम्)

## आगच्छन्तु चर्चां कुर्मः



६. न्यूनातिन्यूनं द्वयोः एतादृश्योः तिथ्ययोः उल्लेखं कुर्वन्तु याभ्यां भवतः अनुसारं राज्ञां कृषकाणां च जीवनयोः भिन्नतायाः ज्ञानं भवति।

७. प्रथमे पृष्ठे शिल्पकार-शब्दस्य विषये जानन्तु। वर्तमाने प्रचलितानां न्यूनातिन्यूनं पञ्चानां पृथक् पृथक् शिल्पानां सूचीं करोतु। किम् एते शिल्पकाराः (क) स्त्री (ख) पुरुषः (ग) स्त्रीपुरुषौ द्वौ वा भवन्ति ?

८. अतीतकाले पुस्तकानि केषु विषयेषु लिखितानि आसन् ? भवती एतेषु केषां पुस्तकानाम् अध्ययनं कर्तुम् एषिष्यति ?

इति प्रथमोध्यायः